# मुण्डितप्रहसनस्य एकमध्ययनम्

**डॉ. शशिकुमारशर्मा**
**सहायकाचार्यः, व्याकरणविभागः,**
**जरारासंविवि.,जयपुरम्**

**ग्रन्थस्य परिचयः वैशिष्ट्यञ्च –**

काव्येषु नाटकं रम्यं इति विचारे समुत्पन्ने शिवज्योतिर्विन्महोदयेन मुण्डितप्रहसनं लिखितम्। तत्र विद्यमानज्ञानम् एतावत् तमसि वर्तते, बहुखेदोऽयं विषयः अस्माकं भारतीयानां कृते इति अस्पष्टम्, अनुद्घाटितम्, अप्रकाशितञ्च इमं ग्रन्थं ज्ञात्वा मया अयं ग्रन्थः सम्पादनाय स्वीकृतः।

ग्रन्थस्यान्ते **इति निष्क्रान्ता सर्वे। मुण्डितप्रहसने शिवज्योतिर्वित्कृते तृतीयोऽङ्कः। समाप्तं चेदं मुण्डितप्रहसनं नाम नाटकम्।** इति पुष्पिका तथा प्रत्यङ्कान् समाप्त्यनन्तरमपि पुष्पिकामिदं दृश्यते। प्रहसनेऽस्मिन् त्रयः अङ्काः सन्ति। प्रहसनेऽस्मिन् दाम्भिकपाखण्डपरिहासः वर्तते इति प्रारम्भे सूत्रधारवचनेन ज्ञायते -

इति प्रबन्धमभिधाय स्वगतम्। अहो अस्मत्प्रबन्धश्रवणसुखेनालिखित इव सर्वतो रङ्गतटस्थो दृश्यते। किञ्च दाम्भिकपाखण्डपरिहासेनेश्वरे भक्तिः सत्सु सङ्गतिस्तेषु विरक्तिश्च भवतीति। तत्परिहासार्थमादिष्टा परिषदा। तत्केन विनोदेनैवैनामुपतिष्ठामः। सत्यामपि धर्मप्राप्तौ दुर्जनानामपि निन्देति ममापि स्मृतिर्नोपजायत इति चिन्तां नाटयति।

**सूत्रधारः** – भद्रादिष्टा स्मः परिषदा। दाम्भिकहासोपन्यासायतत्न्न जानीमः केन विनोदेनैनामाराधयाम इति।

**सूत्रधारः** – भद्र सम्यग्दृष्टवानसि यत्सत्यं शिवज्योतिर्वित्कृतं मुण्डितप्रहसनम्।

**धर्मे रतानां किल धर्मवृद्धिं पाखण्डनिन्दावशतो विधत्ते।**
**ये दाम्भिका वचनमात्रनिष्ठास्तेषां विधेः केवलवज्रपातः।।3।।**

प्रहसने तु प्रायः हास्यरसः प्रधानरसरूपेण भवति। अत्रापि प्रधानरसरूपेण हास्यरसः। सहायकरसरूपेण श्रृङ्गाररसस्यापि वर्णनं दृश्यते। एतेन ज्ञायते यत् प्रहसनकारः प्रहसनस्य सर्वाणि लक्षणानि ज्ञात्वा एव प्रहसनमिदं रचितं, तत्समीचीनं वर्तते। अस्य प्रहसनस्य रचयिता कविः शिवज्योतिर्विद्वर्तते। प्रहसनेऽस्मिन् लीलावतीनाम्नी नायिका वर्तते, नायकस्तु गण्डकीदासः वर्तते। एतयोः कामरूपीप्रेम्णः एकान्तवासस्य च कथा वर्ततेऽस्मिन् प्रहसने। अत एव वक्तुं शक्यते यत् प्रहसनस्यास्य निर्माणं प्रहसनकारेण प्रहसनलक्षणसम्पन्नं प्रहसनमिदं बाल-प्रौढ-वृद्धसामान्यजनानां विशेषरूपेण सामाजिकानां चित्तमाह्लादयिष्यतीति विश्वासेन रचितम्।

**ग्रन्थस्य नामकरणमौचित्यञ्च** – संस्कृतभाषायां रूपकाणां संख्या न तथा लघ्वी नाप्यतिभूयसी, तथापि शताधिका रूपकाकारा गणयितुं शक्यन्ते। रूपकस्यान्यतमो भेदः वर्तते – प्रहसनम्। प्रहसनग्रन्थानां संख्या तु अधिका नास्ति, लघ्वी एव वर्तते। तेष्वेव प्रहसनकारेषु अन्यतमो प्रहसनकारः वर्तते शिवज्योतिर्वित्। येन मुण्डितप्रहसननामकमन्यतमं प्रहसनं लिखितम्। शिवज्योतिर्विन्महोदयेन स्वस्य प्रहसनस्य नामकरणं मुण्डितप्रहसनमिति कृतम्। सामान्यरूपेण नामकरणस्याधारः भवति – 1. नायकस्य नामाधारेण

2. नायिकायाः नामाधारेण

3. वर्ण्यविषयाधारेण

4. घटनाविशेषाधारेण या प्रहसनस्य केन्द्रबिन्दुः भवति।

मालविकाग्निमित्रम्, विक्रमोर्वशीयम्, मालतीमाधवमित्यादीनि नाटकादीनि नायकनायिकयोः नामाधारेण नामकरणं वर्तते। स्वप्नवासवदत्तम्, वेणीसंहारम्, अभिज्ञानशाकुन्तलमित्यादीनि नाटकानि घटनाविशेषाधारेण नामकरणं वर्तते। अस्य प्रहसनस्य नामकरणं कथं कृतं कविना इति चेत् घटनाविशेषाधारेण अस्य प्रहसनस्य नामकरणं कृतं कविना। अस्य प्रहसनस्य नामकरणं घटनाविशेषाधारेण कृतमिति अधोलिखितरूपेण विमृश्यते –

मुण्डितम् प्रहसनं मुण्डितप्रहसनम्। मुण्ड्धातोः क्तप्रत्ययेन निष्पन्नोऽयं शब्दः। सामान्यरूपेण यदि वयं पश्यामश्चेत् अस्य प्रहसनस्य नामकरणं घटनाविशेषाधारेण वर्तते इति ज्ञायते। गण्डकीदासः अस्य प्रहसनस्य नायकः वर्तते। गण्डकीदासोऽत्र मालां चन्दनं योजित्वा ब्रह्मचारिव आचारणं करोति परं लीलावतीं विठ्ठलीं च दृष्ट्वा तस्य मनसि ते प्रति कामासक्तिः जागरिता। तया कामाशक्त्या ताभ्यां साकं संभोगोद्युक्तोऽभवत्। तेन कारणेन राजाज्ञया तस्य शिरसः मुण्डनं विहितम्। अत एव अस्य प्रहसनस्य नामकरणं मुण्डितप्रहसनं जातम्। मुण्डनमेव अस्य प्रहसनस्य घटनाविशेषः भवति। वक्तुं शक्यते यत् अस्य प्रहसनस्य मूलोद्देश्यपूर्त्यर्थं मुण्डितप्रहसनमिति नामकरणं कृतं कविना। अनया रीत्या स्पष्टं भवति यत् प्रहसनस्यास्य नामकरणमतीवौचित्यपूर्णमुद्देश्यपूर्णञ्च वर्तते। नामकरणमत्यन्तसुष्ठुसम्यक्सरलञ्च वर्तते।

ग्रन्थकर्तुः परिचयः -

**शिवज्योतिर्वित्**

कोऽयं शिवज्योतिर्वित् ?

धूर्तसमागमप्रसहनस्य प्रणेता ज्योतिरीश्वरः कः ? इति जिज्ञासायामुच्यते – अयं शिवज्योतिर्वित् ज्योतिरीश्वररेव।

ग्रन्थस्यान्ते इयं पुष्पिता दृश्यते –

**मुण्डितप्रहसने शिवज्योतिर्वित्कृते तृतीयोऽङ्कः। समाप्तं चेदं मुण्डितप्रहसनं नाम नाटकम्।**

प्रहसनस्य प्रारम्भेऽपि सूत्रधारः ग्रन्थकारविषये सूचयति –

**सूत्रधारः – भद्र सम्यग्दृष्टवानसि यत्सत्यं शिवज्योतिर्वित्कृतं मुण्डितप्रहसनम्।**

ग्रन्थस्यान्तिमपुष्पिकादर्शनेन सूत्रधारवचनेन च ज्ञायते यत् इदं मुण्डितप्रहसनं शिवज्योतिर्विद्भिः लिखितम्। एम्. कृष्णाचार्यमहोदयेन संस्कृतसाहित्येतिहासे लिखितं यत् अस्यापरं नाम कविशेखराचार्यः आसीत्। अयं धीरेश्वरस्य पुत्रः, विद्यापतिमहोदयस्य प्रपितामहश्चासीत्। अयं पल्लिजन्मग्रामस्य स्वामी आसीत्। अयं महाशयः सिमरनस्य राजाहरिसिंहस्य मित्रः। येन क्रिस्तोः 1324 तमे वर्षे शासनं कृतम्। मोहम्मदसुल्तानेन साकं युद्धविजयानन्तरम् अनेन धूर्तसमागमप्रहसनं लिखितं, यस्य मञ्चनं विजयोत्सवेऽभवत्। अस्य कालः क्रिस्तोः चतुर्दशशताब्द्यां मन्यते।

मुण्डितप्रहसनमतिरिच्यग्रन्थाः –

धूर्तसमागमप्रहसनम्

पञ्चसायकम्

एम्. कृष्णमाचार्यमहोदयस्य संस्कृतसाहित्येतिहासस्य परिशीलनेन ज्ञायते यत् अस्य मुण्डितप्रहसनमतिरिच्य धूर्तसमागमप्रहसनं पञ्चशायकञ्च द्वौ ग्रन्थौ वर्तेते।

धूर्तसमागमप्रहसनम् –

पञ्चसायकम् – अत्र पञ्चभागाः सन्ति। सौन्दर्यस्य लयात्मकशैली वर्तते। इदं कामशास्त्रस्य मानककार्यं वर्तते।

मातृकाविवरणं सम्पादनप्रक्रिया च – ग्रन्थस्यास्य एका मातृका इदानीमुपलभ्यते। इयं मातृका अलवरस्थराजस्थानप्राच्यविद्याप्रतिष्ठाने उपलभ्यते। अस्या अ इति सङ्केतः स्वीकृतः। अस्या विवरणं वर्णनञ्च एवं वर्तते –

अ मातृका

विवरणम् –

मुण्डितप्रहसनम्

4684. Mundit Prahasan.

| | | |
|---|---|---|
| Page 23 | | Left column |
| Substance | - | Paper |
| Size | - | $13^1/_2$ x 7 inches |
| Sheets | - | 23 |
| Lines | - | 9 to a Page |
| Script | - | Devanagari |
| No. of Granthas | - | 700 |
| Author | - | Shivjyotirvit. |

Complete, Not printed.

Beginning :

**[1]कठिनकुचयुगं ते चञ्चलाक्षिद्वयं ते**
**कुटिलकचचयस्ते मन्दयानं त्वदीयम्।**
**अतिकृशत[नु][2]मध्यस्ते मिथः केलितल्पे**
**प्रलपनमिति रोषात् पातु गौरीशयोर्वः।।1।।[3]**
**[नान्द्यन्ते]**

End - **नरता वर्षन्तु धाराधरा दुष्टाः संक्षयितां**
**व्रजन्तु सुजनाः कुर्वन्तु भक्तिं हरेः कान्ता**
**गाढतरं प्रिया[नन]नरत चुम्बतु भो, राजेन्द्र**
**त्वयि शासति क्षितितलं नदन्तु सर्वाः प्रजाः।।28।।**

श्यालादयः। तह भोठ्ठ।

Colophon: **इति निष्क्रान्ता सर्वे।मुण्डितप्रहसने शिवज्योतिर्वित्कृते तृतीयोऽङ्कः।**

Post colophon : **समाप्तं चेदं मुण्डितप्रहसनं नाम नाटकम्।**

Remarks : The Ms. is in very good condition.

वर्णनम् – एषा मातृका हस्तनिर्मितकर्गजमयी वर्तते। समग्रपत्रोपरि हरिद्रायाः लेपनं वर्तते। सर्वेषु पत्रेषु मुखद्वये लेखनं दृश्यते। पत्रस्याकारः विस्तृतः वर्तते। प्रतिपत्रमुपान्तभागचतुष्टयं वर्तते। वामोपान्तभागे मुं. ना. इति, दक्षिणोपान्तभागे ।।रामः।। इति लिखितं वर्तते। प्रायः सर्वासां मातृकाणां अ, ब इति मुखद्वयं भवति। ब मुखभागे एव पत्रसंख्या भवति। तद्रीत्या अत्रापि वर्तते। मातृकासौ प्राचीनदेवनागरीमयी सम्पूर्णा च विद्यते। अक्षराणि सूक्ष्मरूपाणि परं सुन्दराणि। यद्यप्यक्षराणि करकमषीकया लिखितानि। अत्र सर्वत्र अनुस्वारस्यैव प्रयोगो विद्यते। नैव परसवर्णस्य नैव म् इत्यस्य। यथा – पञ्चमस्य इत्यस्य स्थाने पंचम एव। अत्र प्राचीनदेवनागरीलिपिलेखनाय यथा पृष्ठमात्रादीनां प्रयोगो क्रियते तद्रीत्या अत्र पृष्ठमात्राणां प्रयोगो नैव दृश्यते, अपितु अग्रमात्राणां प्रयोग एव दृश्यते। अत्र एकस्य एव लिपिकारस्य सुलेखनं दरीदृश्यते।

मातृकासम्पादनसरणिः – ग्रन्थाध्ययने सम्पादनसरणिः मुख्यस्थानमर्हति। ग्रन्थसम्पादनं हि मतिमतां प्रयत्नवतामपि कष्टसाध्यं कृत्यम्। तथापि यथाबुद्धिबलोदयं ग्रन्थोऽयं सम्पादितः। ग्रन्थस्यास्य सम्पादनरीतिः दिङ्मात्रेणात्र निरूप्यते। प्रथमतः अमातृकायाः प्रतिकृतिः प्राप्ताः। प्रतिकृतिं स्वीकृत्य देवनागरीलिप्यां लिप्यन्तरं कृतम्। लिप्यन्तरसमाप्त्यनन्तरं पाठसमालोचननियमानां साहाय्येन यथाशक्ति मूलपाठनिरूपणाय प्रयत्नो विहितः। स्वीकृतमूलपाठेऽपि दोषान् ज्ञात्वा प्राप्तमातृकायाः बहुवारमध्ययनं कृत्वा पाठसमालोचननियमानां साहाय्येन,

[1] श्रीगणेशाय नमः।इति अमातृकायामधिकपाठः।

[2] सम्पादकेन योजितपाठः।

[3] अत्र मालिनीवृत्तं वर्तते।

संबद्धग्रन्थानां साहाय्येन च मया शुद्धपाठः कृतः। मूलशुद्धपाठावशिष्टपाठाः समीक्षात्मकपादटिप्पण्यां (Critical Apparatus) लिखिताः। यद्यपि अस्य पाठस्य पादटिप्पण्यां लेखनावश्यकता न विद्यते, तथापि पूर्वजानां लेखनकलासंरक्षणार्थं भविष्येऽनुसन्धानाय च सः पाठोऽपि सम्पादकेन लिखितः। कुत्रचिद् अत्यावश्यकस्थले मया शुद्धपाठपूरणार्थं पाठः योजितः। योजितपाठः दीर्घकोष्ठकेन [....] सूचितः। यत्र अनुस्वारविसर्गादिकमावश्यकं तत्र तद्योजितम्। एवमेव यत्र परसवर्णसन्ध्यक्षरमावश्यकं तत्र तद्योजितम्। व्याकरणमनुसृत्य लिपिकारकृतमात्रावर्तिन्यादिदोषाः सम्पादकेन दूरीकृताः। ते यथाशक्तिः समीक्षात्मकटिप्पण्यां स्थापिताः। मूलग्रन्थे शुद्ध्यर्थं विरामचिह्नादिकं संयोजितम्। सर्वेषां पठनार्थं विसन्धिरचनमादृतम्। तत्र तत्र सन्धिः कृतः। एवं रूपेण सज्जीकृतं मुण्डितप्रहसनं पाठकजनोपयोगि भवतीति विश्वासः।